# Shriradhastotram Brahmanakritam

# શ્રીરાધાસ્તોત્રં બ્રહ્મદેવકૃતમ્

## Document Information

Text title : brahmaNakRitaM shriiraadhaastotram brahmaNakRitaM

File name : raadhaabrahma.itx

Category : devii, rAdhA, stotra, devI

Location : doc_devii

Author : brahma

Transliterated by : Daniel Mohanpersad danielmohanpersad98 at msn.com

Proofread by : Daniel Mohanpersad danielmohanpersad98 at msn.com

Source : brahmavaivarta puraaNa

Latest update : August 15, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# શ્રીરાધાસ્તોત્રં બ્રહ્મદેવકૃતમ્

બ્રહ્મોવાચ ।
હે માતસ્ત્વત્પદામ્ભોજં દૃષ્ટં કૃષ્ણપ્રસાદતઃ ॥ ૧॥

સુદુર્લભં ચ સર્વેષાં ભારતે ચ વિશેષતઃ ।
ષષ્ટિવર્ષસહસ્રાણિ તપસ્તપ્તં પુરા મયા ॥ ૨॥

ભાસ્કરે પુષ્કરે તિર્થે કૃષ્ણસ્ય પરમાત્મનઃ ।
આજગામ વરં દાતું વરદાતા હરિઃ સ્વયમ્ ॥ ૩॥

વરંવૃણીષ્વેત્યુક્તે ચ સ્વાભિષ્ટં ચ વૃતં મુદા ।
રાધિકાચરણામ્હોજં સર્વેષામપિ દુર્લભમ્ ॥ ૪॥

હે ગુણાતિત મે સ્ન્હીઘ્રમધુનૈવ પ્રદર્શય ।
મયેત્યુક્તો હરિરયમુવાચ માં તપસ્વિનમ્ ॥ ૫॥

દર્શાયિષ્યામ્મિ કાલે ચ વત્સેદાનીં ક્સમેતિ ચ ।
ન હીશ્વરાજ્ઞા વિફલા તેન દૃષ્ટં પદામ્બુજમ્ ॥ ૬॥

સર્વેષાં વાઞ્ચિતં માતર્ગોલોકે ભારતેઽધુના ।
સર્વા દેવ્યઃ પ્રકૃત્યંશા જન્યાઃ પ્રાકૃતિકા ધ્રુવમ્ ॥ ૭॥

ત્વં કૃષ્ણાઙ્ગાર્ધસમ્ભૂતા તુલ્યા કૃષ્ણેન સર્વતઃ ।
શ્રીકૃષ્ણસ્ત્વમયં રાધા વા હરીઃ સ્વયમ્ ॥ ૮॥

ન હિ વેદેષુ મે દૃષ્ટ ઇતિ કેન નિરુપિતમ્ ।
બ્રહ્માણ્ડાદ્ બહિરુર્ધ્વં ચ ગોલોકોઽસ્તિ યથામ્બિકે ॥ ૯॥

વૈકુણ્ઠશચાપ્યજન્યશ્ચ ત્વમજન્યા તથામ્બિકે ।
યથા સમસ્તબ્રહ્માણ્ડે શ્રીકૃષ્ણાંશાંશ જીવિનઃ ॥ ૧૦॥

તથા શક્તિસ્વરૂપા ત્વં તેષુ સર્વેષુ સંસ્થિતા ।
પુરુષાશ્ચ હરેરંશાસ્વદંશા નિખિલાઃ સ્ત્રિયઃ ॥ ૧૧॥

આત્મનો દેહરૂપા ત્વમસ્યાધારસ્વમેવ હિ ।
અસ્યા નુ પ્રાણૈસ્ત્વં માતસ્વત્પ્રાણૈરયમીશ્વરઃ ॥ ૧૨॥

કિમહો નિર્મિતઃ કેન હેતુના શિલ્પકારિણા ।
નિત્યોઽયં ચ યથા કૃષ્ણસ્ત્વં ચ નિત્યા તથામ્બિકે ॥ ૧૩॥

અસ્યાંશા ત્વં ત્વદંશો વાપ્યયં કેન નિરૂપિતઃ ।
અહં વિધાતા જગતાં વેદાનાં જનકઃ સ્વયમ્ ॥ ૧૪॥

તં પઠિત્વા ગુરુમુખાદ્ ભવન્ત્યેવ બુધા જનાઃ ।
ગુણાનાં વા સ્તવાનાં તે શતાંશં વક્તુમક્ષમઃ ॥ ૧૫॥

વેદો વા પણ્ડિતો વાન્યઃ કો વા ત્વાં સ્તોતુમીશ્વરઃ ।
સ્તવાનાં જનકં જ્ઞાનં બુદ્ધિર્જ્ઞાનામ્બિકા સદા ॥ ૧૬॥

ત્વં બુદ્ધેર્જનની માતઃ કો વા ત્વાં સ્તોતુમીશ્વરઃ ।
યદ્વસ્તુ દૃષ્ટં સર્વેષાં તદ્વિવક્તું બુધઃ ક્સમઃ ॥ ૧૭॥

યદદૃષ્ટાશ્રુતં વસ્તુ તન્નિર્વક્તું ચ કઃ ક્ષમઃ ।
અહં મહેશોઽનન્તશ્ચ સ્તોતું ત્વાં કોઽપિ  ન ક્ષમઃ ॥ ૧૮॥

સરસ્વતી ચ વેદાશ્ચ ક્સમઃ કઃ સ્તોતુમીશ્વરિ ।
યથાગમં યથોક્તં ચ ન માં નિન્દિતુમર્હસિ ॥ ૧૯॥

ઈસ્વરાણામીસ્વરસ્ય યોગ્યાયોગ્યે સમા કૃપા જનસ્ય ।
પ્રતિપાલ્યસ્ય ક્ષણે દોષઃ ક્ષણે ગુણઃ ॥૨૦॥

જનની જનકો યો વા સર્વં ક્સમતિ સ્નેહતઃ ।
ઇત્યુક્ત્વા જગતાં ધાતા તથૌ ચ પુરતસ્તયોઃ ॥ ૨૧॥

પ્રણમ્ય ચરણામ્ભોજં સર્વેસ્ઃઆં વન્દ્યમીપ્સિતમ્ ।
બ્રહ્મણા ચ કૃતં સ્તોત્રં ત્રિસંધ્યં યઃ પઠેન્નરઃ ।
રાધામાધવયોઃ પાદે ભક્તિં દાસ્યં લભેદ્ ધ્રુવમ્ ॥ ૨૨॥

કર્મનિર્મૂલનં કૃત્વા મૃત્યું જિત્વા સુદુર્જયમ્ ।
વિલઙ્ઘ્ય સર્વલોકાશ્ચ યાતિ ગોલોકમુત્તમમ્ ॥ ૨૩॥

॥ ઇતિ શ્રીબ્રહ્મવૈવર્તે બ્રહ્મણ કૃતં શ્રીરાધાસ્તોત્રં સમ્પુર્ણં॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

*Shriradhastotram Brahmanakritam*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*